**निरुपद्रवः**, त्रि, ( निर्गत उपद्रवो यस्मादिति । ) उत्पातरहितः । यथा,—

"जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम् ।
सौम्यदृष्टिर्भवेद्राजा विकले च शुभं वदेत् ॥"

इति ज्योतिस्तत्त्वम् ॥

**निरुपमः**, त्रि, (निर्गता उपमा सादृश्यं यस्मात् । ) । उपमारहितः । अनुपमः । यथा,—

"गौड़ं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरी ।"

इति प्रबोधचन्द्रोदयः ॥

**निरुपेक्षः**, त्रि, ( निर्गता उपेक्षा यस्मात् ।) यद्वा निर्नास्ति उपेक्षा यस्य सः । अनुपेक्षः । उपेक्षाशून्यः ॥

**निरूढ़ः**, पुं, ( नि + रुह + क्तः । ) निरूढ़लक्षणाकः शब्दः । यथा,—"पूर्ब्बस्वामिसम्बन्धाधीनं तत्स्वाम्युपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढ़ो दायशब्दः ।" इति दायभागः ॥

**निरूढ़लक्षणा**, स्त्री, ( निरूढ़ा लक्षणा । ) शक्तितुल्यलक्षणा । यथा,

"निरूढ़लक्षणाःकाश्चित् काश्चिन्नैव त्वशक्तितः ।"

इति काव्यप्रकाशटीकायां महेश्वरः ॥

**निरूढ़ा**, स्त्री, (निरूढ़ + स्त्रियां टाप् । ) लक्षणाविशेषः । यथा । "काचित् लक्षतावच्छेदकीभूततत्तद्रूपेण पूर्ब्बपूर्ब्बं प्रत्यायकत्वात् निरूढ़ा । यथा आरुण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वादरुणादिपदस्य ।" इति शब्दशक्तिप्रकाशिका ॥

**निरूपणं**, क्ली, ( नि + रूप + णिच् + ल्युट् । ) आलोकः । विचारः । निदर्शनम् । इति मेदिनी । णे, ६६ ॥ ( यथा, महाभारते । ३ । ७१ ।३१ ।

"प्रच्छन्ना हि महात्मानश्चरन्ति पृथिवीमिमाम् ।
दैवेन विधिना युक्ताः शास्त्रोक्तैश्च निरूपणैः ॥"

निरूपयतीति । नि + रूप + णिच् + ल्युः । निरूपके, त्रि । यथा, मार्कण्डेये । १६ । ६६ ।

"एते देवा सहेन्द्रेण मामुपागम्य दुःखिताः ।
तद्वाक्यापास्तसत्कर्म्मदिननक्तं निरूपणाः ॥
याचन्तेऽहर्निशं संस्थां यथावदविखण्डिताम् ॥")

**निरूपितः**, त्रि, ( नि + रूप + णिच् + क्तः । ) कृतनिरूपणः । नियुक्तः । इति श्रीधरस्वामी ॥ यथा, श्रीभागवते । १ । ५ । २३ ।

"निरूपितो बालक एव योगिनां
सुश्रूषणे प्रावृषि निर्विविक्षताम् ॥"

**निरूहः**, पुं, ( निर् + ऊह शून्ये + घञ् । ) वस्तिभेदः । यथा,—

"वस्तिर्द्विधानुवासाख्यो निरूहश्चेतिसंज्ञितः ।
यः स्नेहैर्दीयते स स्यादनुवासननामकः ।
कषायक्षीरतैलैर्यो निरूहः स निगद्यते ॥"

इति सारकौमुदी ॥

अथ निरूहवस्तिकर्म्मविधिः ।

आत्रेय उवाच ।

"चतुरङ्गुलां वेणुमयीं नाड़ीं प्रतिलक्षणां कृत्वा तथा वस्तिप्रतिकर्म्म कुर्य्यात् । नातिक्षीणे च काले च न शीते नच भोजिते । न निद्रादौ न मूत्रार्त्ते विष्ठार्त्ते नच वेदभाक् ॥ वस्तिकर्म्मनिरूहश्च कारयेत्तं निरस्य च । आदौ मूत्रविष्ठोत्सर्गं कृत्वा गुदं प्रक्षाल्य नातिशिथिलशय्यायां शाययित्वा वामाङ्गे वामपादं दक्षिणाङ्गे दक्षिणपादञ्च सङ्कोच्य जङ्घोपरि संस्थाप्य गुदाभ्यन्तरे द्व्यङ्गुलमात्रां नाड़ीं सुधीः सञ्चारयेत् । ततः शनैः शनैः वस्तिं निष्पीड्य द्विपलपरिमिततैलेन निरूहं कुर्य्यात् । निरूहानन्तरं शनैः शनैरुत्तानं शाययित्वोर्द्ध्वीकृत्य च पश्चात् सङ्कोच्य पाणिभिः पञ्चवारान् स्फिक्पिण्डान् चोटयेत् । ततः स्वस्थं कृत्वा क्षीणनाभ्यामाशयं मलस्थानं शोधयति । वस्त्युदरवातान् दोषान् निवारयति । पण्डितास्तं वस्तिनिरूहं तद्वस्तिकर्म्म च विदुः ।" इति हारीतोत्तरे सूत्रस्थाने तृतीयोऽध्यायः ॥

"नरो विरिक्तस्तु निरूहदानं
विवर्ज्जयेत् सप्तदिनान्यवश्यम् ।
शुद्धो विरेकेण निरूहदानं
तद्वाऽस्य शून्यं विकृषेच्छरीरम् ॥"
"विष्वक्स्थितं दोषचयं निरस्य
सर्व्वान् विकारान् शमयेन्निरूहः ।
देहे निरूहेण विशुद्धमार्गे
सस्नेहनं वर्णबलप्रदश्च ॥"

इति सिद्धिस्थाने प्रथमेऽध्याये ॥

"ससैन्धवक्षौद्रयुतः सतैलो
देयो निरूहो बलवर्णकारी ।
आनाहपार्श्वामययोनिदोषान्
गुल्मानुदावर्त्तरुजञ्च हन्यात् ॥
यष्ट्याह्वमूलाष्टपलेन सिद्धं
पयः शताह्वाफलपिप्पलीभिः ।
युक्तं ससर्पिर्मधुवालरक्तः
वैस्वर्य्यवीसर्पहितो निरूहः ॥"

इति सिद्धिस्थाने तृतीयेऽध्याये चरकेणोक्तम् ॥) ऊहशून्यः । निश्चितम् । इति मेदिनी । हे, १८ ॥ निग्रहः । तर्कः । इति हेमचन्द्रः ॥

**निर्ऋतिः**, स्त्री, ( निर्निर्यता ऋतिर्घृणा अशुभं वा यत्र । ) अलक्ष्मीः । इत्यमरः । १ । ८ । २ ॥ (यथा, महाभारते । १ । ८७ । ६ ।

"अरुन्तुदं परुषं तीक्ष्णवाचं
वाक्कण्टकैर्व्वितुदन्तं मनुष्यान् ।
विद्यादलक्ष्मीकतमं जनानां
मुखे निबद्धां निर्ऋतिं वहन्तम् ॥" )

अस्या उपाख्यानं यथा,—

"समुद्रमथनाद्यानि रत्नान्यापुः सुरोत्तमाः ।
श्रेष्ठञ्च कौस्तुभं तेषु विष्णवे प्रददुः सुराः ॥
यावदङ्गीचकारासौ लक्ष्मीं भार्य्यार्थमात्मनः ।
तावद्विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनम् ॥

लक्ष्मीरुवाच ।

असंस्कृत्य कथं ज्येष्ठां कनिष्ठा परिणीयते ।
तस्मात्ममाग्रजामेतामलक्ष्मीं मधुसूदन ! ॥
विवाह्योद्वह मां पश्चादेष धर्म्मः सनातनः ।
तस्माद्धर्म्मव्यतिक्रामं न कुर्य्या मधुसूदन ! ॥

सूत उवाच ।

इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः ।
उद्दालकाय मुनये सुदीर्घतपसे तदा ।
आप्तवाक्यानुरोधेन तामलक्ष्मीं ददौ किल ॥
स्थूलोष्ठीं शुष्कवदनां विरूपां बिभ्रतीं तनुम् ।
सवदारक्तनयनां रूक्षपिङ्गशिरोरुहाम् ॥
स मुनिर्विष्णुवाक्यात्तामङ्गीकृत्य स्वमाश्रमम् ।
वेदध्वनिसमायुक्तमानयामास धर्म्मवित् ॥
होमधूपसुगन्धाढ्यं वेदघोषेण नादितम् ।
आश्रमं तं विलोक्याथ व्यथिता साब्रवीदिदम् ॥

ज्येष्ठोवाच ।

नहि वासानुरूपोऽयं वेदध्वनियुतो मम ।
नात्रागमिष्ये भो ब्रह्मन् ! नयस्वान्यत्र मां ध्रुवम् ॥

उद्दालक उवाच ।

कथं नायासि किञ्चात्र वर्त्तते स्वमतं तव ।
तव योग्या च वसतिः का भवेत् तद्वदस्व माम् ॥

ज्येष्ठोवाच ।

वेदध्वनिर्भवेद्यस्मिन्नतिथीनाञ्च पूजनम् ।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहम् ॥
परस्परानुरागेण दाम्पत्यं यत्र विद्यते ।
पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहम् ॥
दानशौचे न विद्येते परद्रव्यापहारिणः ।
परदाररता यत्र तत्र स्थाने रतिर्म्मम ॥
वृद्धसज्जनविप्राणां यत्र स्यादपमाननम् ।
निष्ठुरं भाषणं यत्र तत्र सम्यग्वसाम्यहम् ॥

सूत उवाच ।

इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत् ।
उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह ॥

उद्दालक उवाच ।

अश्वत्थवृक्षमूलेऽस्मिन्नलक्ष्मि श्रूयतां क्षणम् ।
आश्रमस्थानमालोक्य यावदायाम्यहं पुनः ॥

सूत उवाच ।

इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः ।
प्रतीक्षन्ती चिरं तत्र यदा तं न ददर्श सा ॥
तदा रुरोद करुणं भर्त्तुस्त्यागेन दुःखिता ।
तत्तस्याः क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽशृणोत् ॥
तदा विज्ञापयामास विष्णुमुद्विग्नमानसा ॥

लक्ष्मीरुवाच ।

स्वामिन्मद्भगिनी ज्येष्ठा स्वामित्यागेन दुःखिता ।
तामाश्वासयितुं याहि कृपालो ! यद्यहं प्रिया ॥

सूत उवाच ।

लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः ।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत् ॥

विष्णुरुवाच ।

अश्वत्थवृक्षमाश्रित्य सदालक्ष्मीः स्थिरा भव ।
ममांशसम्भवो ह्येष आवासस्ते मया कृतः ॥
मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति ।
अस्पृश्योऽसौ भवेत्तस्मान्मन्दवारं विना किल ॥
प्रत्यब्दमर्च्चयिष्यन्ति त्वां ज्येष्ठां गृहधर्म्मिणः ।
तेष्वियं श्रीः कनिष्ठा ते सदा तिष्ठत्वनामया ॥"

इति पाद्मोत्तरखण्डे १६१ अध्यायः ॥